श्वास-कास-ज्वर-हरं पथ्यमुष्णोदकं सदा ।
यत् क्वाथ्यमानं निर्व्वेगं निःफेनं निर्म्मलं लघु ॥
चतुर्भागावशेषन्तु तत्तोयं गुणवत् स्मृतम् ।
न च पर्य्युषितं देयं कदाचिद्वारि जानता ॥
अम्लीभूतं कफोत्क्लेशि न हितं तत् पिपासवे ।
मद्यपानात् समुद्भूते रोगे पित्तोत्थिते तथा ॥
सन्निपातसमुत्थे च शृतशीतं प्रशस्यते” ।
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥)

तमुवाच भगवानात्रेयो ज्वरितस्य कायसमुत्थान-देश-कालानभिसमीक्ष्य पाचनार्थं पानीयमुष्णं प्रयच्छन्ति भिषजः। ज्वरो ह्यामाशयसमुत्थः प्रायो भेषजानि चामाशयसमुत्थानां विकाराणां पाचन-वमनापतर्पणानि शमनानि भवन्ति पाचनार्थञ्च पानीयमुष्णं तस्मादेतज्ज्वरितेभ्यः प्रयच्छन्ति भिषजो भूयिष्ठम् । तद्धेयं पीतं वातमनुलोमयति अग्निमुदर्य्यमुदीरयति । क्षिप्रं जरां गच्छति श्लेष्माणञ्च परिशोषयति स्वल्पमपि च पीतं तृष्णा-प्रशमनायोपपद्यते तथा युक्तमपि चैतन्नात्यर्थोत्-सन्नपित्ते ज्वरे सदाहभ्रमप्रलापातिसारे वा प्रदेयमुष्णेन हि दाह-भ्रम-प्रलापातिसारा भूयोऽभिवर्द्धन्ते शीतेनोपशाम्यन्तीति” ।
इति चरके विमानस्थाने ३ अध्यायः ॥)

उष्णोपगमः, पुं, (उष्णः उपगमो यत्र ।) ग्रीष्मकालः । इत्यमरः ॥

उष्मः, पुं, (उष + मक् ।) ग्रीष्मकालः । वसन्तकालः । इत्युणादिकोषः ॥ उष्णः । क्रोधः ॥

उष्मकः, पुं, (उष्म + कन् ।) ग्रीष्मऋतुः । इत्यमरः ॥

उष्मा, [न्] पुं, (उष् + मनिन् ।) ग्रीष्मकालः । उत्तापः । इत्यमरटीकायां नीलकण्ठः ॥
(यथा कुमारे । ५ । २३ ॥
“तपात्यये वारिभिरुक्षिता नवै-
र्भुवा सहोष्माणममुञ्चदूर्द्ध्वगम्” ।
“उष्मा पित्तादृते नास्ति ज्वरो नास्त्युष्मणा विना ।
तस्मात्पित्तविरुद्धानि त्यजेत्पित्ताधिकेऽधिकम्” ॥
इति वाभटे चिकित्सास्थाने १म अध्याये ॥)

उष्मागमः, पुं, (ओषतीति उष्मा । आगच्छतीति आगमः । उष्मा आगमो यत्र ।) ग्रीष्मकालः । इत्यमरटीकायां रायमुकुटः ॥

उस्रः, पुं, (वस + “स्फायितञ्चिवञ्चिशकिक्षिपीति” । २ । १३ । उणादिसूत्रेण रक् ।) वृषः । (यथा, ऋग्वेदे । ६ । १२ । ४ ॥ “वन्वन्नवातो नर्वीसः पितेव” । “उस्रः वृषभः”। इति भाष्यम् ॥) रश्मिः । इति मेदिनी ॥ (यथा रघुः । ४ । ६६ ।
“शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव” ।
लताभेदः । सूर्य्यः । यथा, ऋग्वेदे । ३ । ५८ । ९ ।
“प्र मित्रासो न ददुरुस्रो अग्रे”। “वसति नभसीत्युस्रः सूर्य्यः”। इति भाष्यम् । अश्विनीपुत्त्रौ । यथा तत्रैव । ४ । ४५ । ५ ॥
“अमय उस्रा जरन्ते प्रतिवस्तोरश्विनौ” ॥)

उस्रा, स्त्री, (उस्र + टाप् ।) अर्ज्जुनी । गाइ इति भाषा । उपचित्रा । इन्दुरकाणीति भाषा । इति मेदिनी ॥ (सुरभी गौः । इत्युणादिकोषः ॥)

उह इर् अर्दे । इति कविकल्पद्रुमः ॥ (भ्वादिं-परं-सकं-सेट् ।) ऋद्वादिः । इर् औहत् औहीत् । अर्द इह वधः । इति दुर्गादासः ॥

उह्यानः, पुं, देशविशेषः । इति भूरिप्रयोगः ॥

ऊ

ऊ, दीर्घोकारः । स च षष्ठस्वरवर्णः । अस्य उच्चारणस्थानं ओष्ठः ॥ (“उपूपध्मानीयानामोष्ठौ” । स च (द्विमात्रत्वात्) दीर्घः (त्रिमात्रत्वात्) प्लुतश्च भवति । (प्रत्येकं उदात्तानुदात्तस्वरितभेदात् त्रिविधोऽपि अनुनासिकाननुनासिकभेदात् षड्विधोऽपि भवति ॥
“स्वराणामूष्मणाञ्चैव विवृतं करणं स्मृतम्” ।
इति शिक्षावचनात् अस्योच्चारणे विचार आनन्तरप्रयत्नः । विवृतं जिह्वाग्रादेः स्पर्शनाभावः । यदुक्तं तत्रैव “अचोऽस्पृष्टायणस्त्वीषत् नेमस्पृष्टाः शलः स्मृताः” । इति ।)
“शङ्खकुन्दसमाकारं ऊकारं परमकुण्डली ।
पञ्चप्राणमयं वर्णं पञ्चदेवमयं सदा ॥
पञ्चप्राणयुतं वर्णं पीतविद्युल्लता तथा ।
धर्म्मार्थकाममोक्षञ्च सदा सुखप्रदायकम्” ॥
इति कामधेनुतन्त्रम् ॥ तस्य (वङ्गीयभाषायाम्) लेखनप्रकारो यथा,—
“तद्रूपाधोगता रेखा कुञ्चिता वामतः शुभा” ।
तद्रूपा पूर्व्वोक्तोकाररूपा ।
“तिष्ठन्ति तासु रेखासु यमाग्निवरुणाः क्रमात् ॥
अधोर्द्ध्वगामिनी मात्रा लक्ष्मीर्वाणी च सा स्मृता” ।
इति वर्णोद्धारतन्त्रम् ॥*॥ तस्य नामानि यथा,—
“ऊः कण्ठको रतिः शान्तिः क्रोधनो मधुसूदनः ।
कामराजः कुजेशश्च महेशो वामकर्णकः ॥
अर्घीशो भैरवः सूक्ष्मो दीर्घघोणा सरस्वती ।
विलासिनी विघ्नकर्त्ता लक्ष्मणो रूपकर्षिणी ॥
महाविद्येश्वरी षष्ठा षण्डोभूः कान्यकुब्जकः” ।
इति तन्त्रम् ॥ (मातृकान्यासेऽस्य वामकर्णे न्यस्यतया तदाख्ययाप्यभिधानम् । यथा, मातृकान्यासमन्त्रे “उं नमो दक्षिणकर्णे ऊं नमो वामकर्णे” । अनुबन्धविशेषः । यथाह कविकल्पद्रुमे । “उः क्त्वावेभूस्तु वेटकः । तेन सिध् शास्त्रे इत्यस्य लुङि कृते असेधीत् असैत्सीत् इति स्यात् ॥)

ऊ, व्य, (वेञ् + क्विप् ।) वाक्यारम्भः । रक्षा । अनुकम्पा । इति मेदिनी ॥ (सम्बोधनम् ॥)

ऊः, पुं, (अवति रक्षतीति । अव + क्विप् । ज्वरत्त्वरेत्यूट् । ६।४।२० ।) महेश्वरः । इति पुरुषोत्तमः ॥ चन्द्रः । इति शब्दरत्नावली ॥ (रक्षाकर्त्तरि, त्रि॥)

ऊढ़ः, त्रि, (उह्यते स्म । वह् + क्त ।) विवाहितः । इति स्मृतिः ॥
(“भार्य्योढ़ं तमवज्ञाय तस्थे सौमित्रयेऽसकौ” । इति भट्टिः । ४ । १५ ॥) हृतवहनः ॥

ऊढ़कङ्कटः, त्रि, (ऊढ़ो धृतः कङ्कटो येन ।) कवचधारी । तत्पर्य्यायः । सन्नद्धः २ वर्म्मितः ३ सज्जः ४ दंशितः ५ । इत्यमरः ॥

ऊढ़ा, स्त्री, (वह + क्त + टाप् ।) भार्य्या । इति हेमचन्द्रः ॥ (विवाहिता कन्या । यथा,—
“ऊढ़ानूढ़ासमवायेऽनूढ़ैव प्रथमं धनहारिणी” ।
इति स्मृतिः ॥)

ऊतं, त्रि, (वे + क्त ।) तन्तुसन्ततम् । तत्पर्य्यायः । स्यूतम् २ उतम् ३ । इत्यमरः ॥ कापड़ बोना इति भाषा ॥ (ग्रथितम् । अव + क्त । ज्वरत्त्वरेत्यूट् ६ । ४ । २० । रक्षितम् ॥)

ऊतिः, स्त्री, (अव् + क्तिन् । ज्वरत्त्वरेत्यूट् । ६ । ४ । २० ।) रक्षणम् । (वे + क्तिन् ।) स्यूतिः । इति मेदिनी ॥ बोना सेलाइ इति भाषा । क्षारणम् । इति शब्दरत्नावली ॥ जवनम् । इत्यमरटीकायां स्वामी ॥ लीला । इति श्रीभागवतम् ॥ (कर्त्तरि क्तिचि । रक्षाकर्त्ती । यथा, ऋग्वेदे । ४ । ४ । २ ॥ “उरुष्यन्तम् माध्वी दस्रा न ऊतीः” । कर्म्मणि क्तिन् । पुराणस्य दशविधलक्षणमध्ये कर्म्मवासनारूपो लक्षणभेदः । यथा, भागवते । २।२०—१४ ।
श्रीशुक उवाच ।
“अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ।
मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ॥
दशमस्य विशुद्ध्यर्थे नवानामिह लक्षणम् ।
वर्णयन्ति महात्मानः श्रुतेनार्थेन चाञ्जसा ॥
भूतमात्रेन्द्रियधियां जन्म सर्ग उदाहृतः ।
ब्रह्मणो गुणवैषम्यात् विसर्गः पौरुषः स्मृतः ॥
स्थितिर्वैकुण्ठविजयः पोषणं तदनुग्रहः ।
मन्वन्तराणि सद्धर्म्म ऊतयः कर्म्मवासनाः” ॥
“कर्म्मवासना ऊतयः” । इति चूर्णिकाटीका ॥)

ऊधः, [स्] क्ली, (उन्द + असुन् । ऊधसो नङिति निर्देशात् ऊधादेशः ।) आपीनम् । इत्यमरः ॥ गाइर पालान् इति भाषा । (यथा महाभारते । चैत्ररथपर्व्वणि । १ । १७६ । १३ ॥
(“मण्डूकनेत्रां स्वाकारां पीनोधसमनिन्दिताम्” ।
“यदैव स्त्रियै स्तनावाप्यायेते ऊधः पशूनाम्” ।
इति शतपथब्राह्मणे । २ । ५ । १ । ५ ॥)

ऊधस्यं, क्ली, (ऊधसि भवम् । ऊधस् + यत् ।) दुग्धम् । इति हेमचन्द्रः ॥

ऊन,त् क परिहाने । इति कविकल्पद्रुमः ॥ (अदन्त-चुरां-परं-सकं-सेट् ।) दीर्घादिर्दन्त्योपधः । तथा च । “क्षोभमाशु हृदयं न यदूनां रागवृद्धिमकरोन्न यदूनाम्” । इति माघयमकम् । परिहानं न्यूनक्रिया । ऊनयति वणिक् स्वर्णं प्रथमपरिमाणात् । परिमाणमात्रेऽयमिति केचित् । मा भवान् ऊनिनत् । ऊनधोर्णिः अङ् द्वित्वे स्वस्थानमेव नास्ति अतो नाग्लोपित्वमिति सन्देहनिरासार्थमाह । ओनेऋर्दनुबन्धज्ञापकबलात् द्वित्वात् प्राक् प्राप्तो ह्रस्वो अग्लोपित्वान्न स्यात् । इति दुर्गादासः ॥

ऊनं, त्रि, (अवतीति । अव + “इणषिञ्जिदीङुष्यविभ्यो नक्” । ३ । २ । इति उणादिसूत्रेण नक् । “ज्वरत्वरेति” । ६।४ । २० ऊट् । सर्व्वस्ते तु ऊनयतेरूनमिति साधितम् ।) हीनम् । न्यूनम् ॥
(“ऊनं न सत्त्वेष्वधिको बबाधे” । इति रघुः । २ । १४ ॥ तत्रैव । ११ । १ ।